ISSN 2454 8596
www.vidhyayanaejournal.org
VIDHYAYANA
An International Multidisciplinary Research e-Journal

# वैदिक साहित्य औशधिविग्यान

प्रयोजक:
डॉ.मधुभाई एम. हीरपरा
अध्यापक: (M.A.,M.Ed.,Ph.d.)
द.गो.शि.महाविद्यालय,
अलीयाबाडा ।जि.जामनगर.

## शोधपत्रम्

### ❑ प्रस्तावना :

सृष्ट्यादौ परमात्मना प्रस्फुटयते स्म ज्ञानाग्निवायोरादित्यांगिरार्चतु र्ऋषिणामन्तर्करणेषु यत दर्शनं तत प्रसिध्धं वेदनाम्ना।[१] अतः नामकरणमपि तेषामोपरि विहितं ऋकयजुसामाथर्वाः।

प्रागैतिहासिककालात भारतीयचिन्तनपरम्परायाम् सांस्कृतिकगतिविधेः आमूलपरीक्षणम कृत्वा यदि पश्येम तर्हि प्रतीयते यत देशप्रतिभाः कालस्यानंतव्याहतप्रवाहे लोकमङ्गल उदात्तादर्श च लक्ष्यीकृत्य संदधति।सर्वोत्कृष्टप्राचीनतमश्रुतिसाहित्यैव सर्वेषाम लौकिकानां विषयाणाम उदभवस्थानमस्ति।तेषु एकं औषधिशास्त्रमपि कल्पते तस्योत्पत्तिः अथर्ववेदस्य शौनकीयशाखायाम् तथा तस्यापराभिधानम् यातुवेदः वा भेषजवेदः।

अथर्ववेदे प्राचूर्य वर्तते वनौषधिवर्णनस्य।जीवन-नैरुज्य-दीर्घायुकामनाभ्यः औषधिविज्ञानं वरप्रदानं अस्माकम कृते। वनौषधिविज्ञानविषये चक्तदर्शनं अथर्वागिरस्यादित्रऋषिणाम प्रशस्यते भूरि-भूरि। किं प्रयोजनं औषध्याः ?रोगजननं ; आर्त्तीनाशाय तासाम ज्ञानमावश्यकं संसारयोनीमिव।

### रोगनिमित्तानि

रोगस्य जननीभूतानि कारणानि त्रीणि-

१-शरीरान्तरगतविषसंचयात जनिता विकृतिः-

२ जीवाणवः-

३ त्रिदोषाश्च।

### रोगाभिधानानि

तेभ्यः जनितेभ्यः रोगाः सन्ति-कास-अपचित-बलास-जायान्य-हरिमा-मूत्ररोध-आस्त्राव-विषूची-हत्कम्पन-क्षेत्रिय- बिसल्प-विद्रधिप्रभृतयः सन्ति।तथा च नेत्राङ्गादीनि जातानि रोगाः प्रख्याताः तस्मिन् काले।

### रोगनिर्मूलनोपायाः

शल्यक्रिया [२] ,औषधिशास्त्रं,मणिप्रभावः च । ऋषिणा प्राथ्यते-

कुर्वन्नेह कर्म्माणि जिजीविषेच्छतं समाः।[3]

सा प्रार्थना तस्मै जीवाय।[४] सः जीवः एषः वर्णितो इ्श्वररूपेण।[५] शिवभिन्नमनुज :जीवो भूत्वा सैव सुख-दुःखानि अनुभवति।तस्य कृते मनस्स्वरूपं तत् मनः यस्मिनास्पदं निधाय निहितं[६] तत् निरूपणं,शरीराङ्ग-ज्ञानेन्दिय-भाव-रक्तसंचार-प्राणापानानाम् विवरणं च दत्तं ऋषिभिः।ताः कष्टकारीण्यः जीवानुभूत्याः सुखदुःखादिन्यः परिस्थित्यः निवारणीयाः। अतएव दीर्घायुप्रार्थना सुगन्धिनी यत्र-तत्र।

### दीर्घायुप्रार्थना

शतायोः पूर्वं न मृत्यु आयात् तस्य कृते अवसानावरुध्य स्तौति ऋषिः-

मृत्योः पदं योपयन्तः।[७] व्यन्ये यन्तु वा मृत्युः यानाहुरितराञ्छतम्----।[८] शतधा मृत्युं वर्णयति द्रष्टा। वेददर्शकस्य दृष्टिः कीद्रशी सम्यक्,सा जीवं दीन-हीनस्वरूपयुतं दृष्टुम् असमर्था। पश्यतु मध्यतः कः प्रतिष्ठितम्[९] मृत्योः विरोधं कृत्वा स्पन्दनं ऋषेः दृष्टव्यम्।

अदीना स्यामःशरदः शतम्।[१०]

शतायुः भूत्वा मनुष्यः आध्यात्मिकोन्नतिं कृत्वा दीर्घायुः भवेत्।

ISSN 2454 8596
www.vidhyayanaejournal.org
VIDHYAYANA An International Multidisciplinary Research e-Journal

यथा-

प्राञ्चो अगाम नृतये हसाय द्राघीय आयुः प्रतरं दधाना।[११]

अरे वा आगच्छत् मरणं अपहाय विनयेत्।

आरोहतायुर्जरसं वृणाना सजोषा अनुपूर्वं यतमाना यतिष्ठ।

इह त्वष्टा सुजनिमा सजोषा दीर्घमायुः करोति जीवसे वः।।[१२]

तर्हि येन प्रकारेण आयुर्महत्ता तत्वृध्यर्थे सांप्रतम् या मान्यता आयुवृध्यर्थे "निश्चता न वध्धिशीला आयुः" एषा वेदविरुध्धा, अकालमृत्योः त्राणोपायाः औषधिप्रयोगः क्षितायुमपि शतायुं कर्तुं सामर्थ्यशीलो भवति। उपमितआयोः सबोधनं भावपूर्वकमयथा दिनानि आनुपूर्वीयाः सन्ति ऋतवः ऋतुभिः सह चलन्ति; यतः पूर्वोत्पन्नं पुरुषं न त्यजेत अनुजः।हे घातः आयुः इदृशी भवेत्। अनेन मंत्रेण स्तौति मंत्रदृष्टा-

अयं जीवतु मा मृतेम समीरयामसि।

कृणोम्यस्मै भेषजं मृत्योः मा पुरुषं वधीः।।

नया कामनया बलवर्धका-वीर्यशीला-वृष्या-जीवलां-नधारिषां-जीवन्तीं औषधिं ऋषिः आह्वयति; वैधास्तित्वं च अत्र घोषितं-

कृणोमि ते प्राणापानौ जरां मृत्यु दीर्घमायुः स्वस्ति।

वैवस्वतेन प्रहितान् यमदूतांश्चरतोप सेधामि सर्वान्।।[१४]

चिकित्सकः वदति हे रोगी ते सर्वाणाम् रोगाणाम् विषं निष्कास्य स्वस्थं करोमि-

यक्ष्माणां सर्वेषाम् विषं निरवोचहम्।[१५]

अन्यत् कारणमस्ति जीवाणवः वा क्रिमि।वक्ति निरुक्तकारः क्रमते मेघति क्रमतेर्वा स्यात्। ते क्रिमयः अन्नादि द्वारभूतं कृत्य शरीरं प्रविशन्ति। यथा गजयक्ष्माक्रिमि पक्षीव शरीरान्तरं गच्छति तस्यकृते मिलति उपमितं दृष्टांतम्। तदनन्तरं मृतवत्सा-वन्ध्यत्वादयः रोगाः तस्मादैव जायन्ते।[१६]

तृतीयकारणमस्ति रोगोत्पत्तेः प्राणाः। मनुष्यजीवनवर्धकाः ते एव क्वचित् प्राणघातकाः भवन्ति, वात-पित्त-बलासाः।तेषाम् वातं प्राणापानौव्यानसमानोदानभेदेभ्यः वर्णितं-

को अस्मिन् प्राणमवयत् को अपानं व्यानम्।

समानमस्मिन् को देवोऽधिशिश्राय पूरुषे।। वा

पिप्प्लीयाः वातरोगः पलायते। अथति सः वातः रोगजनकः।"वातिकृतस्य भेषजी---[१७]"इद्रृशं यकृत-क्लोम-गवीनिकानाम् वायव्यपदार्थेभ्यः चिकित्सा क्रियमाणः वरुणः "न मिनाति पित्त्म्"वा चाषान् पित्त्ने---[१८] अस्मिन् मंत्रे स्पष्टीकरणं अभवत् यत् पित्त्शान्त्यै वायव्यद्रव्याणि उपयोगीनि।तथैव मंत्रोस्ति-

सुपर्णो जातः प्रथमस्तस्य त्वं पित्तमासिथः।

तदासुरीयुधे जिता रुपं चक्रे वनस्पतिन्।।[१९]

त्रिदोषे एको बलासः।यतोहि जगंडि तस्य कृते प्रयुक्ते।अत्र त्रिधातुशब्दस्य अन्ये अर्थाः क्रियन्ते स्म विद्वभिः।एको अर्थो क्रियते तस्य शब्दस्य वातादयः। विषमे काले ते एव रोगाणाम् जनकाः सन्ति।उल्लिखितमस्ति

त्रयो दासा आञ्जनस्य तक्मा-बलास-आदिहि।[२०] बलासनाशिका कृत्यादूषणी नाम्ना उल्लिखिता।[२१]

## भिषक्

सन्ति औषधयः रोगत्राताः परम् तासाम् कः ज्ञाता?" भिषति चिकित्सते"शब्दः मिलति। सैव परमात्मा नाम्नाभिहितः -

यथा-

उन्ना वीर्रा अर्पय भेषजेभिभिरषिक्तिमं त्वा भिषजो---।[२२]

प्रकारेण द्विधा अयम् प्राकृतिक-मानुषः च।अग्न्यादयः देवाः दैव्यभेषजाः सन्ति। नेषु दिव्यचिकित्सकाः निम्नांकिताः।

अग्निः त्वं भिषकाः भेषजास्यासि कर्ता।[२३]

तथा च-

वरुणं भिषजां पतिम्।[२४]

अपरः-

उत त्या दैव्या भिषजा शं न करतो अश्विना।[२५] शल्यप्रकरणे

अन्यः-

या वो भेषजा मरुतः शुचीनि।[२६]

ये सर्वे देवाः दैव्यभिषकः सन्ति।

इतरः मानुषभिषजः कीद्रृशः? यश्चकार स निष्करत स इव सुभिषक्तमः।

स एव तुभ्यं भेषजानि कृणवद्भिषजा शुचिः।।[२७]

सः करोति रोगीनं नैरुज्ययुतं।स एव आगया-पृश्निहा-वृच्छका-अपराजिता-औषध्यावृत्ताभिधानेन वर्णितः वैद्यः।कियत् सांप्रतम्।कैः साधनैः विमुक्तः भवति रोगी? उत्तरोऽस्ति औषधयः।

### औषधयः

आञ्जनम्-अपची-गौदुग्ध-सुर्यस्नान-शरकाण्ड-मृगशृंग-अर्जुनकाण्ड-असिक्नि-श्यामा-अजशृंगी-पृश्नीपर्णी-सर्षप-शतवारमणि-कृष्ठ-काष्मर्य-गुगलादीऔषधयः वेदे भूरि-भूरि वर्णिताः।ताः एव गुणबोधकाः नान्मा अपक्रीता-उदकात्मानः-उन्मुचन्ति-एकशृंगा-कृष्णा-दिव्या-नमस्यन्ती-पुष्पवती-प्रचेतस्-प्रसूवरी-प्रस्तृणतीवावशाना-विश्वभेषजी-मातर-सजित्वरी-स्तम्बिनी-सहस्त्रनाम्नी सन्ति।

### रोगौषधयः

ज्वरः-

यस्य नाम तक्मा अस्ति।आमाशयाग्नि ज्वरस्तु खलमहेश्वरकोपप्रभवः श्रुतौ वर्णितो।यो वै रुद्रः सो अग्निः; रुद्रकोपाग्निजठराग्नेः विकृतिरूपः क्ष्टकारकः गुणभेदेन सहस्त्राक्षः, शीर्षलोकः, व्यंग, वितृतीयः, प्रसिध्धः नाम्ना।

अद्यतनीन् टाइफोइडसदृशाः प्रचलन्ति ज्वराः।तस्यकृते औषधस्योल्लेखः विद्यते जगंडि।[२८] कुष्ठा ।[२९] आञ्जनम् ।[३०]

कासः-

अथर्ववेदे कासस्योल्लेखः वर्तते।तक्मन् कासमित्र अस्ति।

बलासः-

कफजन्य बलासः वर्णितः-

अस्थिस्त्रंसं परुःस्त्रंसमास्थितं हृदयामयम्।

बलासं सर्वं नाशयाङ्गेष्ठा यश्च पर्वसु।।[३०]

सः तक्मनभ्राता अस्थिपरुयोः शिथिलकर्त्ता अस्ति।तस्य कृते औषधिदर्शनमस्ति-

यथैव-

यौ ते बलास तिष्ठतः मुष्कावपश्रितौ।

वेदाहं तस्य भेषजं चीपुद्रुरभिचक्षणम्।।[३१]

अत्र चीपुद्रुमभेषजरूपेण स्थापितं अस्मै रोगाय।

अपचितः-

तस्य वर्णनं संक्षिप्तं।"अपाक चीयमाना अपचित्" अर्थात् यः गण्डतः कक्षापर्यन्तं प्रथितः सः गण्डमाला,सैव अपची कथ्यते।पुरुषवीर्य्यं अपचिनोति। प्रकारेण सः भेदेषु विभाजितः एनी-श्येनी-कृष्णा-रोहिणी-असूतिका-रामायणी-ग्लौ-गलुन्त-ग्रैव्य-नान्मा वेदे वर्णितो।तस्य निराकरण्यौषधिः

वृक्षमूलवेधनं-सूर्य-चंद्रौ च।[३२]

राजयक्ष्माः-

पापयक्ष्मा-जायान्य-स्त्रीभ्यः जनितो रोगः।जीवाणुभिः प्रसरवान् यः रोगः अनेकैः कारणैः जायते।ओषधिः निर्दिष्टा तस्य कृते सुगन्धिद्रव्यहोम; आञ्जनम् च-

योहरिमा जायान्योऽङ्गभेदो विसल्पकः।

सर्वं यक्ष्ममंगेभ्यो बहिर्निर्हन्त्वांजनम्।।[33]

अथवा-

सः चंद्रसंबंधिः अपि मन्यते। [34]

पाण्डुरोगः-

सः हरिमा-कामला-हरितनाम्नाभिहितो।वनस्पतिः तस्य कृते आञ्जनम् अभिष्टा।रक्तवर्णगौदुग्धं वा सूर्यस्नानं च अभिप्सितं।

तेन सह वर्धितोहृतरोगमपि।सूर्यप्रार्थना क्रियते ऋषिभिः-

उद्यन्नद्यमित्रमह आरोहन्नुत्तरां दिवम्।

हृद्रोगं मम सूर्य हरिमाणं च नाशय।।[35]

मूत्ररोगः-

मूत्ररोगः-रोधःच यदि भवेत् तर्हि मूत्रद्वाराणि अन्यानि तत् बहिर्निष्का-सनाय करणीयानि यथा आंत्र-गवीनि-वस्तीत्यादीनि शरीरे। तस्य कृते उपयोगीनि औषधिः शरकाण्डमूलक्वाथ।तस्य अन्यं नाम भावप्रकाश-निघण्टौ मूत्रकृच्छाक्षिरोगनुत्।[36]

क्षेत्रियरोगः-

यः वंशपरंपरायाः आयाति।[37] अन्योर्थोऽस्तिगर्भोत्पन्नः। अधुना थेलेसेमियासदृशाः रोगाः अस्याम् श्रेण्याम् आयान्ति। अस्य असाध्यरोगस्य कृते सिध्धप्रदः समयः उदितविचृतितारागणः; अस्मिन् काले करणीया चिकित्सा तस्य रोगस्य।अपरा वीरुत्-मृगशृंग-अपामार्ग-जल-अर्जुनकाण्ड-यवतुष-तिलपिञ्जी-मर्दिन्यः सन्ति।मृगशृंगाय लिखितं-

हरिणस्य रघुष्यदोऽधिशीर्षणि भेषजम्।[38]

स क्षेत्रियं विषाणया विषूचनिमनीनशत्।।तीव्रजवाहरिणशृंगयोः यावस्थितौषधिः सा सूचीवत् व्यथाकारी क्षेत्रीयं नामशेषं करोति।

किलासः-

कुष्ठरोगः किलासं पलितं च नाम्नाभिहितो वेदे। दूषिकारणात् भवति यः। किलासपलितौ भेदौ कुष्ठस्य।असिक्नं श्यामां च प्रार्थयते वैद्यः।हे औषधयः पलितं रंजय-

नक्तं जातास्योषधे रामे कृष्णे असिक्न च।

इदं रजनि रंजय किलासं पलितं च यत्।।[३९]

राक्त्योत्पन्नौषधिः राम-कृष्णरूपरोगौ हर।

आस्त्रावः-

मूत्र-नासिका-गुदाव्रणादेभ्यः स्त्रवणं भवति यः आस्त्रावरोगः ज्ञायते।अरूः स्त्राणः वा भेषजः पर्वतारूढाम् ताम् उत्पाट्य पयुज्यत चिकित्सकेन रोगिणः कृते।

नीचैःखनन्त्यसुरा अरुस्त्राणमिदं महत्।

तदास्त्रावस्य भेषजं तदु रोगमशीशमत्।।[४०]

रक्तसंचारः-

रक्तसंचार'यास्ते शतं धमनयोऽन्यनु विष्ठिता।'[४१] संदर्भोस्ति यः।

VIDHYAYANA

विषूचीः-

अयुक्ताहारविहारजन्यो रोगः अस्ति। तम् निवारकाः देवाः-

सोमा रुद्रा युवमेतान्यस्मद्विश्वा तनुषु भेषजानि धत्तम्।तस्यौषधरूपौ देवौ सूर्य-चंद्रमसौ स्तः।

उन्माद-

शारीरिकरोगस्य सदृशं मानसिकरोगस्य वर्णनं दृश्यते अत्र।यदि ते मन उद्युतं।[४३] सः देवकृत-पाप-ज्वर-राक्षसादिभ्यः जनितः मन्यते।अग्निः मारको देवः तम्।

कृणोमि विद्वान् भेषजं यदानुन्मदितो सति।[४४]

इतररोगौषधयः

शल्यक्रिया-

यथा-

अस्थिभङ्ग-त्रिधा ह श्याव अश्विना विकस्तं उज्जीवयसे ऐरयताम् सुदान।[४५]

दृष्टिदानं-
यथा-

ऋज्राज्वाय दृष्टिदानं अश्विना कृतं।[४६]

गर्भाधानं-
यथा-

पूंसि वै रेतो भवति तत स्त्रियामनुषिच्यते।[४७]

औषधिना सह गर्भकरणं करणीयं।[४८]

वाजीकरणं-
यथा-

अश्वसदृशदीर्घ-स्थूल-सवीर्य-दृढशिश्नेन गर्भाधानसामर्थ्यं वाजीकरणं कथ्यते।कृशातुरः- क्लीबः-मृतप्रजः शेपहर्षण्यौषधिना पुष्टः क्रियते।

विषादजन्यं-
जंगमविषः सर्पदंशः च सदृशाःविषजंतुनाम् विषं पीडयति मनुष्यं तदा-
प्रियश्च मा जीवीः प्रेत्य गम्यतु त्वां विषं।[४९]
तदेव वृश्चिक-मशक-जीवाणु-जलचारी-शृङ्ग-मल-मूत्रादयानाम् विषं कष्टकारी मनुष्याय भवति।तस्य कृते विषघ्नौषधयः मधू-पिंषल-दर्भ-तरुणक-आवती-अश्ववार-पुरुषवार-बाणी-वामीमृत्तिका-वरणावत्यः विषनाशिकाः सन्ति।

अन्योपायेन मणिप्रभावीभूत

अपराणि प्राकृतिक-प्राणिज-खनिज-समुद्रजानि रोगापहानि द्रव्याणि। ताः सर्वे पुरुषजीविन्यः अपक्रीताः गुणवत्यः अभिष्टताः उग्राः कृत्यादूषण्यः अंशुमत्याः दिव्याः ध्रवाः शतधामाः भवन्ति औषधयः।

यथा-

औदुम्बर-जगंडि-दर्भ-प्रतिसर-फालवरणादयः रोगनाशकाः भवन्ति।

अंततः औषधज्ञः ताः न तु जडाः मन्यते परम् चेतन्यरुपाः मत्वा संबोध्यते।अतएव फलवती भूत्वा मनुष्यमित्राणि भवन्ति वेदकाले इदानीमपि च।

टिप्पणी-

१ मनुस्मृतिः-१:२१

२ श-ब्रा-१२:६:१, १३तः१४

३ द्वा सूपर्णा सयूजा---ऋ:१:१६४:२०

४ यजर्वेद-४०:२
५ " ४०:८

६ यज्जाग्रतो---यु अ३४:१

७अथर्ववेदः-१०:२

८ ऋग्वेद-१०:१८:२

९ अथर्ववेद-१०:२

१० यजुर्वेद, अ-३६:२४

११ ऋग्वेद-१०:१८:२

१२ " १०:१८:६

१३अथर्ववेद-८:२:६

१४ " -८:२६:६

१५ " -९:८:१०

१६ " -७:७६:४

१७ " -६:१०९:३

१८ यजर्वेद-२५:७

१९ अथर्ववेद-१:२४:१

२० " -४:९:८

२१ " -८:७:१०

२२ ऋग्वेद-२:३३:४

२३ अथर्ववेद-५:२९:१

२४ यजुर्वेद-२१:५८

२५ उत त्वा दैव्या---

२६ अश्विना---ऋ-८:१८:८

२७ अथर्ववेद-२:९५

२८ " -१९:३४:१०

२९ " -५:४:९

३० " -४:९:८

३१ " -६:८:३

३२ तै सं -२:३:५:२

३३ अथर्ववेद-१९:४४:२

३४ काठकसंहिता-११:३

३५ ऋग्वेद-१:५०

३६ भावपकाशनिघण्टु-१:२:१

३७ सायण

३८ अथर्ववेद-३:७

३९ " -१:२३:१

४० " -२:३

४१ " -६:९०:२

४२ " -. ७:४२:२

४३ " -६:१११:२

४४ " -६:१११:३

४५ ऋग्वेद-१:११७:२४

४६ " -१:११७:१७

४७ अथर्ववेद-६:११

४८ " -५:२५:६

४९ " -५:१३:४